**M.A. (Part—I) (Old) Examination**

**SANSKRIT**

**(Poetics & Aesthetics)**

**Paper—IV**

Time : Three Hours] [Maximum Marks : 100

**सूचना** :—उत्तराणि स्वीकृतभाषयैव लिखत।

**(काव्यशास्त्रज्ञाः)**

1. कयोरपि **द्वयोः** काव्यशास्त्रज्ञयोः प्रमुखान् काव्य-सिद्धान्तान् प्रतिपादयत : 20

   (1) दण्डी।

   (2) आचार्यमम्मटः।

   (3) आनन्दवर्धनः।

   (4) वामनः।

**(नाट्यशास्त्रम्)**

2. नाट्यशास्त्रस्य प्रथमाध्यायमनुसृत्य नाट्यवेदस्योत्पत्तिं सवर्ण्य तत्स्वरूपं प्रतिपादयत। 10

**अथवा**

नाट्यशास्त्रानुसारं रङ्गपूजायाः आवश्यकतां स्पष्टयत।

**अथवा**

टिप्पण्यौ लिखत :

(1) भरतमुनिः।

(2) नान्दी।

(3) भारतीवृत्तिः।

(4) नाट्यालङ्काराः।

**(मृच्छकटिकम्)**

3. **त्रयाणां** सप्रकरणमनुवादं कुरुत :— 15

   (1) वाप्यां स्नाति विचक्षणो द्विजवरो मूर्खोऽपि वर्णाधमः
   फुल्लं नाम्यति वायसोऽपि हि लतां या नामिता बर्हिणा।
   ब्रह्मक्षत्रविशस्तरन्ति च यया नावा तयैवेतरे
   त्वं वापीव लतेव नौरिव जनं वेश्यासि सर्वं भज।।

(2) सत्यं न मे विभवनाशकृतास्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति।
एतत्तु मां दहति, नष्टधनाश्रयस्य
यत् सौहृदादपि जनाः शिथिलीभवन्ति।।

(3) कामं नीचमिदं वदन्तु पुरुषाः स्वप्ने च यद्वर्द्धते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्यं न शौर्यं हि तत्।
स्वाधीना वचनीयतापि हि परं बद्धो न सेवाञ्जलिः
मार्गो ह्येष नरेन्द्रसौप्तिकवधे पूर्वं कृतो द्रौणिना।।

(4) गुणेषु यत्नः पुरुषेण कार्यो न किञ्चिदप्राप्यतमं गुणानाम्।
गुणप्रकर्षादुडुपेन शम्भोरलङ्घ्यमुल्लङ्घितमुत्तमाङ्गम्।।

(5) दाक्षिण्योदकवाहिनी विगलिता याता स्वदेशं रतिः
हा हालङ्कृतभूषणे ! सुवदने ! क्रीडारसोद्भासिनि।
हा सौजन्यनदि ! प्रहासपुलिने ! हा मादृशामाश्रये
हा हा नश्यति मन्मथस्य विपणिः सौभाग्यपण्याकरः।।

4. चारुदत्तस्य दारिद्र्यविषयकान् अभिप्रायान् वर्णयत। 15

अथवा

'मृच्छकटिकम्' इति प्रकरणस्य शीर्षकस्य अन्वर्थकतां प्रतिपादयत।

अथवा

टिप्पणीद्वयं लिखत :

(1) नान्दी।

(2) वसन्तसेना।

(3) शर्विलकः।

(4) भिक्षुः।

(5) शूद्रकः।

(शिशुपालवधम्)

5. (अ) केषाञ्चन त्रयाणां सविवरणम् अनुवादं कुरुत :— 12

(1) गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।
पतत्यधोधाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः।।

(2) पतत्पतङ्गप्रतिमस्तपोनिधिः पुरोऽस्य यावन्न भुवि व्यलीयत।
गिरेस्तडित्वानि तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः।।

(3) तमर्घ्यमर्घ्यादिकयाऽऽदिपूरुषः सपर्यया साधु स पर्यपूजत्।
गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणाः।।

(4) युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवामुदः।।

(5) करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत् तव स्तवम्।
हरे ! हिरण्याक्षपुरस्सरासुरद्विपद्विषः प्रत्युत सा तिरस्क्रिया।।

(ब) टिप्पणीद्वयं लिखत :— 8

(1) माघे सन्ति त्रयो गुणाः।

(2) नारदमुनेः वर्णनम्।

(3) शिशुपालवधमहाकाव्यसय मङ्गलाचरणम्।

(4) इन्द्रसन्देशः।

(ध्वन्यालोकः)

6. केषाञ्चन चतुर्णा सविवरणम् अनुवादं कुरुत :— 20

(1) स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः।
त्रायन्तां वो मधुरियोः प्रपन्नार्तिच्छिदो नखाः।।

(2) प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।

(3) काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।

(4) आलोकार्थी यथा दीपशिखायां यत्नवान् जनः।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः।।

(5) यत्रार्थः शब्दों वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सुरिभिः कथितः।

(6) रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।
लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः।।

(7) मुख्यां वृत्तिं परित्यज्य गुणवृत्त्याऽर्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः।।

(8) कस्यचिद् ध्वनिभेदस्य सा तु स्यादुपलक्षणम्।
लक्षणेऽन्यैः कृते चास्य पक्षसंसिद्धिरेव नः।।